दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

पञ्चाङ्गम्
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शरद-ऋतुः
सूर्यः दक्षिणायनम् मार्गशीर्षकृष्णषष्ठी
कार्तिक २५ प्रविष्ठांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-19 | 1 | नवम्बर, 10 2025 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 २०३२ तमे वर्षे हिमाचलं सर्वाधिकं समृद्धं सुखदं च राज्यं भविष्यति - मुख्यमंत्री सुक्खुः

3 पूर्वोत्तरभारतवर्षात् संस्कृतभारत्याः अखिलभारतीयोधिवेशने उत्कृष्टयोगदानम्

5 प्रो. प्रेमचंद शास्त्री 'संयोजनम् - 2025' इत्यत्र आजीवनं योगदानहेतवे सम्मानितः

## प्रधानमन्त्री नरेन्द्रमोदी उत्तराखंडे अष्टसहस्रकोट्यधिकरूप्यकाणां अनेकविकासपरियोजनानाम् आधारशिलां स्थापितवान्




**हिमसंस्कृतवार्ताः -** उत्तराखण्ड-स्थापनादिवसस्य रजतजयन्ती समारोहः आमान्यते। अस्मिन् अवसरे प्रधानमन्त्री नरेन्द्रमोदी देहरादूनस्य वन-अनुसंधान संस्थाने आयोजिते कार्यक्रमे अष्टसहस्रकोट्यधिकरूप्यकाणां अनेकविकासपरियोजनानां आधारशिलां स्थापितवान्। एताः परियोजनाः पेयजलं, सिञ्चनं, तकनीकीशिक्षा, ऊर्जा, नगरविकासः, क्रीडा, कौशलविकासश्च अनेकैः क्षेत्रैः संबद्धाः सन्ति। प्रधानमन्त्री श्रीमोदी शस्याधारित योजनायाः अन्तर्गतं अष्टविशतिः सहस्राधिक कृषकाणां वित्तकोशेषु द्विषष्टिकोट्यधिकरूप्यकाणां वित्तीय सहायतां अपि प्रदत्तवान्। अस्मिन् अवसरे प्रधानमन्त्री स्मारक डाक प्रपत्रम् अपि प्रकाशितवान्। समारोहं सम्बोधयता तेन राज्यस्य स्थापना दिवसस्य रजतजयन्ती उत्सवमाधृत्य उत्तराखण्डस्य जनेभ्यः शुभकामनाः प्रदत्ताः। सः अवदत् यत् उत्तराखण्डः विगतेषु पञ्चविंशतिः वर्षेषु विभिन्नेषु क्षेत्रेषु महतीं प्रगतिम् अकरोत्। श्रीमोदी राज्यस्य अप्रयुक्तक्षमतां संवर्धनार्थ आवश्यकतां सबलं प्रतिपादितवान् । प्रधानमन्त्री प्रोक्तवान् यत् प्रशासनं उत्तराखण्डस्य विकासाय सततं प्रयासरतः वर्तते। इतः पूर्व प्रधानमन्त्री नरेन्द्रमोदी एकां प्रदर्शनी अवलोकितवान् सममेव हितधारकैः सह परिचर्चा अपि विहितवान्। उत्तराखण्डः स्वस्य स्थापनायाः रजतोत्सवं आचरति। द्विसहस्रतमे वर्षे अस्मिन् दिने एव उत्तराखण्डः भारतगणराज्यस्य सप्तविंशतितमे राज्यस्वरूपे संस्थापितः आसीत्। राष्ट्रपतिः द्रौपदी मुर्मुः, गृहमन्त्री अमितशाहः, रक्षामन्त्री राजनाथसिंहः, केन्द्रीय स्वास्थ्यमन्त्री जगत प्रकाश नड्डा अन्ये च मन्त्रिणः अपि उत्तराखंड राज्यस्य स्थापनायाः रजत जयन्त्योपलक्ष्ये जनेभ्यः शुभकामनां प्रदत्तवन्तः।

## सुभाषितम्

**तपः श्रेष्ठं प्रजानां हि,**
**मूलमेतन्न संशयः।**
**कुटुम्बविधिनानेन,**
**यस्मिन् सर्वं प्रतिष्ठितम्।।**

अर्थात्- तपस्या श्रेष्ठ कर्म है। निस्संदेह यही प्रजावर्ग का मूल कारण है। परन्तु गार्हस्थ्य- विधायक शास्त्र के अनुसार इस गार्हस्थ्य-धर्म में ही सारी तपस्या प्रतिष्ठित है।




## अमेरिका-भारत-अर्धचालकम एआई-अभियानानां योजनानां च विषये चर्चाम् अकरोत् अमेरिकायां भारतस्य राजदूतः विनय-मोहन-क्वात्रा



**हिमसंस्कृतवार्ताः -** अमेरिकायां भारतस्य राजदूतः विनय-मोहन-क्वात्रा इत्येषः इन्टेल-संस्थायाः मुख्य-कार्यकारी अधिकारिणा लिप्-बू-टैन इत्यमुना सह भारते संस्थायाः अर्धचालकम् सहैव एआई-अभियानानां योजनानां च विषये चर्चाम् अकरोत्। एषा प्रातिभासिक-वार्ता एतस्मिन् समये सम्पन्ना यदा भारत-सर्वकारः स्वस्य अर्धचालकम्-एआई-उद्योगानां सुदृढीकरणाय प्रयासेषु वेगं धारयति।

## भारतीय वायुसेनायाः पूर्वीय-वायु-विभागेन स्वस्य त्रिनवतितमस्य वार्षिकोत्सवस्य उपलक्ष्ये गुवाहाटी-नगरे ब्रह्मपुत्र नद्याः उपरि विमान-प्रदर्शनम् कृतम्



भारतीय-वायुसेनायाः पूर्वीय-वायु-विभागेन स्वस्य त्रिनवतितमस्य वार्षिकोत्सवस्य उपलक्ष्ये गुवाहाटी-नगरे ब्रह्मपुत्र-नद्याः उपरि एकं भव्यं विमान-प्रदर्शनम् कृतम्। प्रथमतया पूर्ण-मानेन आयोजिते अस्मिन् वायु-प्रदर्शन भारतीय वायुसेना ब्रह्मपुत्र नद्याः उपरि स्थिते लाचित-घट्टे पञ्चविंशत्यधिकासु संरचनासु पञ्चसप्तत्यधिकानां विमानानाम् सहैव उदग्रयानानाञ्च प्रदर्शनम् अकरोत्। अस्मिन् वर्षे वायुसेना-दिवस-समारोहः "अचूक, अभेद्य, सटीकः इति विषयवस्तुनः ऊपरि केन्द्रितम् आसीत् । एतत् तावत् वायुसेनायाः परिचालन-क्षमतायाः, आनुकूल्यस्य प्रतीकम् अस्ति। अस्मिन् अवसरे असम-राज्यस्य राज्यपालः लक्ष्मण-प्रसाद-आचार्यः, मुख्यमन्त्री हिमन्त-बिस्वा-सरमा सहैव एयर चीफ मार्शल अमर-प्रीत सिंहः इत्येते उपस्थिताः आसन्।

## राष्ट्रिय-स्वयं-सेवक-संघः समाजे विभाजनव्यवस्थां समाप्तुं सम्पर्ककार्यक्रमान् आरभ्य सामाजिकसौहार्दस्य कृते कार्यं करिष्यति - सरसंघचालकः मोहन भागवतः

**हिमसंस्कृतवार्ताः -** राष्ट्रिय-स्वयं-सेवक-संघस्य सरसंघचालकः मोहन भागवतः प्रोक्तवान् यत् तस्य संस्था समाजे विभाजनव्यवस्थां समाप्तुं सम्पर्ककार्यक्रमान् आरभ्य सामाजिकसौहार्दस्य कृते कार्यं करिष्यति। बेङ्गलूरु नगरे सञ्जातायां व्याख्यानमालायां संघस्य शतवर्षाणां यात्रा- नव क्षितिज इति विषयमधिकृत्य श्रीमोहन भागवतः प्रोक्तवान् यत् सप्तपञ्चाशदधिक-अष्टादशतमे वर्षे स्वतन्त्रतायाः प्रथमयुद्धस्य काले हिन्दू मुस्लिम च द्वयोः अपि ब्रिटिश शासनात् मुक्तिं प्राप्तुं एकत्रिताः अभवन्।

## गुजरात-आतङ्कवाद-निरोधक-दलेन गान्धीनगरस्य अडालज-क्षेत्रात् त्रयः सन्दिग्ध-आतङ्कवादिनः निगडिताः

**हिमसंस्कृतवार्ताः -** गुजरात-आतङ्कवाद-निरोधक-दलेन गान्धीनगरस्य अडालज-क्षेत्रात् त्रयः सन्दिग्ध-आतङ्कवादिनः निगडिताः। प्रारम्भिक-अनुसन्धानेन विज्ञातं यत् एते त्रयः आतङ्कवादिनः 'आईएसआईएस सङ्गठनेन सह सम्बद्धाः आसन्। निगृहीतानां आतङ्कवादिनां समीपतः शस्त्राणि अपि अधिकृतानि । एते त्रयः आतङ्कवादिनः देशस्य विभिन्नेषु भागेषु आक्रमणस्य षड्यन्त्रं कुर्वन्तः आसन् । आतङ्कवाद-निरोधक-दलं एटीएस इति एतेभ्यः आतङ्कवादिभ्यः परिपृच्छां कृत्वा अग्रे अन्वेषणं कुर्वदस्ति ।

# २०३२ तमे वर्षे हिमाचलं सर्वाधिकं समृद्धं सुखदं च राज्यं भविष्यति - मुख्यमंत्री सुक्खुः



**हिमसंस्कृतवार्ताः- हमीरपुरम्।** देवभूमिः हिमाचलप्रदेशः २०३२ तमवर्षपर्यन्तं देशस्य सर्वाधिकसमृद्धं, सम्पन्नं, धनी च राज्यम् भविष्यति। हिमाचलसर्वकारः स्वावलम्बनस्य हिमाचलस्य स्वप्नस्य पूर्तये निरन्तरं अग्रे गच्छति। २०२७ तमवर्षपर्यन्तं राज्यं स्वनिर्भरं भविष्यति, यस्य कृते ग्राम्य-अर्थव्यवस्था सुदृढा भवति। आगामिषु पञ्चषु वर्षेषु एतत् राज्यं देशस्य आर्थिकदृष्ट्या सर्वाधिकं सुदृढं राज्यं भविष्यति। हिमाचलप्रदेशस्य मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः नादौनविधानसभाक्षेत्रस्य भ्रमणकाले कड़साईस्थाने एतानि वचनानि अकथयत्। सः अवदत् यत् अस्माकं सर्वकारस्य निर्णयाः आम्लकस्य रुचिः इव सन्ति। आम्लकं प्रथमं किञ्चित् कटुः स्वादु भवेत्, परन्तु पश्चात् मधुरः भवति। अस्माकं सर्वकारस्य निर्णयाः अद्य जनानां कृते आश्रयं जनयन्ति। सः अवदत् यत् केन्द्रसर्वकारेण विविधप्रतिबन्धाः स्थापिताः अपि राज्यसर्वकारः हिमाचलीजनानाम् अपेक्षां पूर्णतया पूरितवान् अस्ति। राज्यस्य जनानां हितं सर्वोपरि कृत्वा कठिनपरिस्थितौ निर्णयाः कृताः सन्ति। ग्राम्य-अर्थव्यवस्थां सुदृढां कर्तुं जनान् कृषिकार्यं कर्तुं प्रोत्साह्यते इति मुख्यमन्त्री अवदत्। कृषकाणां आर्थिकबलं सुदृढं कर्तुं क्षेत्रेषु उत्पादितानि धान्यानि सर्वकारः क्रीणाति। प्राकृतिकरूपेण उत्पादितः गोधूमः प्रतिकिलोग्रामं ६० रुप्यकाणां दरेण क्रियन्ते, मक्काशस्यस्य क्रयणं प्रतिकिलोग्रामं ४० रुप्यकेण क्रियते। सः अवदत् यत् हिमाचले हरिद्रा-उत्पादनस्य अपारसंभावना अस्ति। हरिद्रा इति शस्यं यस्य वन्यजन्तुभिः विनाशस्य संकटः नास्ति। अतः कृषकाणां हरिद्रासंवर्धनार्थं प्रोत्साहनं क्रियते। ग्राम्यकृषकेभ्यः राज्यसर्वकारः प्रतिकिलोग्रामं ९० रुप्यकाणां दरेण हरिद्रां क्रीणाति। अस्य अर्थः अस्ति यत् हरिद्रासस्यं ग्राम्य-अर्थव्यवस्थायाः सुदृढीकरणस्य उत्तमं साधनं सिद्धं भविष्यति। यदि कोऽपि बृहत्प्रमाणेन हरिद्रासंवर्धनं करोति तर्हि निश्चितरूपेण लक्षशः आयं जनयिष्यति। मुख्यमन्त्री अवदत् यत् राज्यसर्वकारः गोदुग्धस्य कृते ५१ रुप्यकाणि प्रतिसेटकं समर्थनमूल्यं प्रददाति, महिषदुग्धं च ६० रुप्यकाणि प्रतिसेटकं क्रयणं क्रियते। तेन सह द्विकिलोमीटर- अनन्तरं प्रतिकिलोमीटर-द्वयरूप्यकाणां दरेण भाटकरूपेण भुक्तिः क्रियते। सः अवदत् यत् राज्यसर्वकारेण मनरेगा दैनिकवेतनमपि ८० रुप्यकाणि यावत् वर्धितम्। येन मनरेगा कार्यकर्तारः लाभं प्राप्नुयुः। राजीवगांधी वन संवर्धनयोजनायाः अन्तर्गतं वनसंरक्षणस्य प्रवर्धनं क्रियते। २५ कानालभूमिषु वृक्षरोपणार्थं महिलामण्डलाय,युवकमण्डलाय १ लक्षं २० सहस्ररुप्यकाणां प्रोत्साहनं दास्यते। यदि प्रथमवर्षे रोपितानां वृक्षाणां ५० प्रतिशतं अपि सफलता भवति तर्हि अग्रिमे वर्षे पुनः एकलक्षरुप्यकाणां दानस्य प्रावधानं कृतमसवति। सौर ऊर्जायाः प्रवर्धनार्थं सौरसंस्थानस्थापनं प्रति जागरूकतां जनयितुं कार्यं क्रियते इति सः अवदत्। जनाः सौरसंस्थानानि स्थापयित्वा स्वस्य आयं वर्धयितुं शक्नुवन्ति।

# बिहारविधानसभा निर्वाचनस्य द्वितीयान्तिम चरणाय प्रचाराभियानं समाप्तम्




**हिमसंस्कृतवार्ताः** - बिहारविधानसभा-निर्वाचनस्य द्वितीयान्तिम चरणाय प्रचाराभियानं समाप्तम् । अस्मिन् चरणे मंगलवासरे विंशति-जनपदानां द्वाविंशत्युत्तरशतम् विधानसभा-क्षेत्रेषु मतदानं भविष्यति। द्वितीयचरणे त्रि-दशमलव-सप्तकोट्यधिकाः मतदातारः षत्रिंशदधिकैकशतं महिलाः समेत्य व्यधिक त्रयोदशशतं अभ्यर्थिनां निर्वाचन-भाग्यं निर्णेष्यन्ति। निर्वाचन-प्रचारस्य अन्तिमे दिने एनडीए-सङ्घटस्य महागठबंधनस्य तथैव अन्येषां दलानां च शीर्ष नेतारः निरन्तरं निर्वाचन-सभासु पथ-प्रदर्शनेषु च निरताः सन्ति। कैमूर-जनपदे एकां जनसभां सम्बोधयन्, जनतादलस्य अध्यक्षः मुख्यमन्त्री नीतीश कुमारः अवदत् यत् तस्य कार्यकाले अत्यन्त-दुर्बलायाः विद्युत-स्थितेः परिष्कारो सञ्जातः। भाजपा-दलस्य वरिष्ठ नेता उत्तर-प्रदेशस्य मुख्यमन्त्री योगी-आदित्यनाथः अररिया-स्थलस्य सिकटी-क्षेत्रे एकां जनसभां सम्बोधयन् उत्कृष्ट-रेल-वायु-सम्पर्कस्य उल्लेखम् अकरोत्। अपरस्मिन् पक्षे महागठबंधनस्य मुख्यमन्त्री-पदस्य अभ्यर्थी तेजस्वी यादवः कैमूर-जनपदे एकाम् निर्वाचन-सभां सम्बोधयन् प्रमाणितवान् यत् तेन स्वस्य सप्तदश-मासात्मके अल्पीयसि कार्यकाले युवकेभ्यः पञ्च-लक्ष-सर्वकारीय-सेवाः प्रदत्ताः। अत्रान्तरे, जन-सुराजस्य संस्थापकः प्रशान्त-किशोरः पूर्वी-चम्पारण-जनपदस्य कल्याणपुर-क्षेत्रे पथ-प्रदर्शनं कृतवान्।

# मातुः परिश्रमस्य मूल्यं ज्ञात्वा विश्वविजेता अभवत् रेणुकाठाकुर हाटकोटीमन्दिरं प्रणम्यः गृहं प्राप्ता



**हिमसंस्कृतवार्ताः- शिमला।** आईसीसी महिलाक्रिकेटविश्वचषकं जित्वा भारतीयतीव्रकन्दुकक्रीडिका रेणुकाठाकुर रविवासरे स्वस्य गृहनगरं रोहरुं प्राप्ता तत्र तस्याः हार्दिकस्वागतं जातम्। रेणुका अवदत् यत् सा स्वमातुः कृतस्य परिश्रमस्य मूल्यं ज्ञातवती। तस्याः सफलतायां तस्याः माता सुनीताठाकुर, पितृव्यः भूपिन्दरठाकुरः च महत् योगदानं दत्तवन्तौ। सा अवदत् यत् परिश्रमः कदापि विफलः न भवति । विश्वचषकविजयेन बालिकानां क्रिकेट-क्रीडायां रुचिः अधिका भविष्यति। आगामिविश्वचषकस्य विजयाय प्रयत्नाः आरब्धाः एव सन्ति। रेणुकाठाकुर रविवासरे रोहरुनगरस्य पारसाग्रामे स्वगृहं प्राप्तवती। ततः पूर्वं सा हाटकोटीमन्दिरं प्रणामम् अकरोत्। रेणुका अवदत् यत् स्पर्धायाः समये नित्यं अवसादः भवति। एतस्य अवसादस्य निवारणाय वासगृहे प्रसन्नवातावरणं निर्मीयते। अतः सा मयूरस्य चित्रणं कृत्वा अवसादनिवारणं सकारात्मकशक्तिं प्रसारयितुं च प्रयतते स्म। सा अवदत् यत् एतत् आधारस्तम्भं प्राप्तुं पारिवारिकसमर्थनेन सह दिवारात्रौ परिश्रमस्य आवश्यकता भवति।

### यदि सर्वकारः मञ्चं प्रदास्यति तर्हि प्रत्येकः युवा एतत् साधयितुं शक्नोति

रेणुका उक्तवती यत् विश्वचषकविजयानन्तरं हिमाचलसर्वकारः प्रथमतया तस्याः कृते पुरस्कारधनस्य घोषणां कृतवान्। ततः सा दलस्य सर्वेभ्यः क्रीडकेभ्यः अभिनन्दनानि प्राप्तवती। प्रधानमन्त्रिणा सह मिलित्वा सा गर्वम् अनुभवति स्म। रेणुका उक्तवती यत् यदि सर्वकारः समये प्रतिभां स्वीकृत्य मञ्चं प्रददाति तर्हि प्रत्येकः युवा एतत् आधारस्तम्भं प्राप्तुं शक्नोति।

# राष्ट्रपतिपदासीना द्रौपदी मुर्मुः लुआण्डा-नगरे स्वकीयेन अङ्गोला-देशस्य समकक्षेण जोआओ-लौरको इत्यमुना सह द्विपक्षीयां-वार्ताम् अकरोत्



**हिमसंस्कृतवार्ताः** - राष्ट्रपतिपदासीना द्रौपदी मुर्मुः लुआण्डा-नगरे स्वकीयेन अङ्गोला-देशस्य समकक्षेण जोआओ-लौरको इत्यमुना सह द्विपक्षीयां-वार्ताम् अकरोत्। इतः पूर्व आगमन-काले लुआण्डा-स्थित-राष्ट्रपति भवने तस्याः भव्यं स्वागतम् सञ्जातम्। द्वावपि नेतारौ भारत-अङ्गोलादेशयोः बहुविध-सहभागितां दृढीकर्तुं व्यापक-वार्ताम् अकुरुताम्। चर्चावधौ राष्ट्रपतिः मुर्मुः विभिन्नेषु क्षेत्रेषु सहयोग-वर्धनार्थं बलम् प्रायच्छत् । राष्ट्रपतिः बहुषु क्षेत्रेषु भारतस्य विशिष्ट-विशेषज्ञताम् रेखाङ्ङ्कितवती सहैव पारस्परिक विकास-समृद्ध्योः कृते एतेषाम् अवसराणां लाभप्राप्तये अङ्गोलया सह मिलित्वा कार्यं कर्तुं भारतस्य तत्परताम् अपि प्रख्यातवती। अत्रावसरे उभाभ्यामपि पक्षाभ्यां चिह्नितक्षेत्रेषु सहयोगस्य औपचारिकीकरणाय विविधेषु सन्धि-ज्ञापकेषु हस्ताक्षरं विहितम् ।

# मुख्यमन्त्री सोमवासरे मण्ड्याम् आपदा-पीडितानां कृते सहायताराशिं समर्पयिष्यति

**हिमसंस्कृतवार्ताः- मण्डी।**
वर्षाग्रस्तहिमाचलप्रदेशे स्वगृहाणि त्यक्तवद्भ्यः जनेभ्यः मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः आश्रयवितरणं करिष्यति। आश्रयवितरणकार्यक्रमः नवम्बर् १० दिनाङ्के मण्डीनगरस्य पड्डलप्राङ्गणे आरभ्यते। येषां गृहाणि नष्टानि तेषां पड्डलं प्रति परिवहनस्य व्यवस्थां सर्वकारीयाधिकारिणः करिष्यन्ति, बससेवा च प्रदास्यन्ति। मण्डीनगरे अस्यां आपदाश्रयवितरणकार्यक्रमे कुल्लूः, बिलासपुरं, मण्डी इत्यादीनां प्रभाविताः जनाः समाविष्टाः भविष्यन्ति येषां गृहाणि वर्षायाः कारणेन पूर्णतया वा आंशिकरूपेण वा नष्टानि अभवन्।
प्रशासनेन लाभार्थिभ्यः अस्य कार्यक्रमस्य विषये सूचनाः प्रदत्ताः, तेषां पड्डलभूमौ परिवहनस्य पूर्णव्यवस्था च कृता अस्ति। मण्डीमण्डले प्रभावितान् जनान् पड्डलम् आनेतुं सम्बन्धिताय एसडीएम इत्यस्मै निर्देशः दत्तः अस्ति। मण्डीनगरे ७१७ गृहाणि पूर्णतया नष्टानि सन्ति, १४०० तः अधिकानि गृहाणि आंशिकरूपेण क्षतिग्रस्तानि सन्ति। मण्डीमण्डले आपदाश्रयविनियोगस्य अन्तर्गतं प्रायः २४०० जनानां कृते आश्रयं प्रदत्तं भविष्यति। मण्डीजनपदस्य उपायुक्तः अपूर्वदेवगनः इत्यनेन उक्तं यत् नवम्बर् १० दिनाङ्के मण्डी, कुल्लूः, बिलासपुरम् इत्यत्र प्रभावितानां कृते आश्रयनिधिः वितरिता भविष्यति येषां गृहाणि पूर्णतया वा आंशिकरूपेण वा पतितानि सन्ति।

## प्रभाविताः जनाः बसयानेन आनयिष्यन्ते

धर्मपुरस्य एसडीएम जोगिन्दरपटियालः अकथयत् यत् 43 परिवाराणां गृहाणि पूर्णतया नष्टानि। तदतिरिक्तं प्रायः १२२ परिवाराः सन्ति येषां गृहाणि आंशिकरूपेण क्षतिग्रस्तानि सन्ति। मुख्यमन्त्री १० नवम्बर दिनाङ्के मण्ड्यां पड्डलप्राङ्गणे एतेषां प्रभावितानां कृते चेकवितरणं करिष्यति। सर्वेषां प्रभावितानां जनानां परिवहनार्थं बसयानानां व्यवस्था क्रियते।

## राज्यसर्वकारः प्रभावितपरिवारेभ्यः आश्रयनिधिं प्रदास्यति

वर्षायां ये परिवाराः स्वगृहं त्यक्तवन्तः तेषां कृते चतुर्लक्षरूप्यकाणि, आंशिकरूपेण प्रभावितानां गृहस्वामिनः च एकलक्षरूप्यकाणि यावत् प्राप्नुयुः। मण्डीनगरस्य ५९२ गृहस्वामीभ्यः राज्यसर्वकाराद् विशेषसंकुलेन १,३०,००० रुप्यकाणि प्राप्तानि सन्ति। एतेषां प्रभावितानां जनानां कृते १० नवम्बर दिनाङ्के २,७०,००० रुप्यकाणि प्रदास्यन्ते।अतिरिक्तं येषां गृहाणि पूर्णतया नष्टानि अभवन्, तेषां विशेषाश्रययोजनायाः अन्तर्गतं केवलं अस्थायी आश्रयं प्राप्तम्, तेषां कृते ४,००,००० रुप्यकाणां राशिः चेकमाध्यमेन प्राप्यते।

# धर्मपालमैमोरियल क्रिकेट प्रतियोगितायाः तृतीये संस्करणे दधोगी एकादश दलेन सौरभ एकादश घणागुघाटदलं 2 धावनांकाभ्यां पराजितम्




## चमनशर्मा चयनितः स्पर्धापुरुषः, प्रतियोगितायाः सर्वश्रेष्ठक्रीडकः

**हिंसंस्कृतवार्ताः- कामेश्वर शर्मा।** अर्जुनक्रीडांगणे धर्मपाल मैमोरियल क्रिकेट प्रतियोगितायाः तृतीये संस्करणे गतदिवसे अन्तिमचक्रे दधोगी एकादशदलेन सौरभएकादश घनागुघाटदलं 2 धावनांकाभ्यां पराजितम्। पणकं विजित्य दधोगी दलेन फलकक्रीडा चयनिता। चमनस्य अविजित 30*, सुनीलस्य 17 तथा रोहितस्य 11 धावनांकानां साहाय्येन निर्धारितेषु 12 कन्दुचक्रेषु दधोगी दलेन 4 स्तोभहानौ 74 धावनांकाः अर्जिताः। सौरभएकादश पक्षतः प्रवीण तथा हरीशः 2-2 स्तोभौ गृहीतवन्तौ। प्रत्युत्तरे सौरभ एकादशदलस्य प्रारम्भः सुदृढः नाभवत्। मात्र 32 धावनांकेषु 6 क्रीडकाः बाधिताः। दीपू इत्यस्य 20 तथा हरीशस्य 9 धावनांकानां साहाय्येन सौरभ एकादश दलेन 11.1 कन्दुचक्रेषु दश स्तोभ हानौ मात्र 72 धावनांकाः एव अर्जिताः। प्रतियोगितायाः समापने अर्की विधानसभायाः विधायकः मुख्यातिथिरूपेण उपस्थितः। सः विजेता- उपविजेता दलाभ्यां तथा श्रेष्ठ क्रीडकेभ्यः पुरस्कारमयच्छत्। स्वकीयोत्तमप्रदर्शनाय चमनशर्मा स्पर्धापुरुषः, प्रतियोगितायाः सर्वश्रेष्ठः क्रीडकः च चयनितः। मुख्यातिथिमहोदयेन क्रीड़ाक्षेत्रस्य निर्माणाय 2 लक्ष रूप्यकाणि, आयोजक समितये च 21000 रूप्यकाणि दातुं घोषणा कृता। विजेतृदलाय 51000 रूप्यकाणाम्, उपविजेतृदलाय च 31000 रूप्यकाणाम् राशिं प्रदाय सम्मानितवान्।

# पूर्वोत्तरभारतवर्षात् संस्कृतभारत्याः अखिलभारतीयोधिवेशने उत्कृष्टयोगदानम्




**हिमसंसकृतवार्ता, गुवाहाटी, नयनज्योतिशर्मा।**
संस्कृतभारत्याः अखिलभारतीयम् अधिवेशनम् अद्य नवम्बरमासस्य नवमे दिनाङ्के तामिलनाडुराज्यस्य कयोम्बटुर इति स्थाने अमृता-विश्व-विद्यापीठे सफलतया सम्पन्नम् जानम्। गतः ७ दिनाङ्कात् आयोजितं त्रिदिवशीये कार्यक्रमेऽस्मिन् आभारतवरतेभ्यः आविश्वात् च संस्कृतभारत्याः दायित्ववन्तः विशिष्टाः कार्यकर्तारः स्वकुटुम्वैः सह आगतवन्तः। तत्र सम्पूर्णेभ्यः उत्तरपूर्वाञ्चलेभ्यः चतुर्भ्यः प्रान्तेभ्यः ११० जनाः समागताः। तेषु उत्तर असमप्रान्तपक्षतः ८१ जनाः, दक्षिण असमप्रान्ततः १७ जनाः, त्रिपुरायाः ११ जनाः अरुणाचलप्रदेशादपि १ जनः आगतवन्तः। प्रवन्धकरूपेनापि तत्र केचन उपस्थिताः आसन्। कार्यक्रमेऽस्मिन् केचन कार्यकर्तारोपरि नूतनदायित्वमपि प्रदत्तम्। तत्र कुमारभास्करवर्म-संस्कृतपुरातनाध्ययन- विश्वविद्यालयस्य कुलपतिः आचार्यः प्रह्लाद रा. जोशीवर्याय ईशान्यक्षेत्रस्य अध्यक्षपदम् अर्पणं कृतम्। एवम् उत्तर असमप्रान्तस्य सह-प्रान्तमन्त्री नयनज्योति शर्मा, गुरुचरणविश्वविद्यालयस्य आध्यापकः डा. केशवलूयिटेलाय दक्षिण असमप्रान्तस्य प्रान्तमन्त्रिणः दायित्वं, केन्द्रीय- संस्कृत-विश्वविद्यालयस्य संस्कृताध्ययनकेन्द्रस्य शिक्षिकायै कृष्णासिन्हा-महाभागायै तस्य प्रान्तस्य सह-प्रान्तमन्त्रिणः दायित्वम्। मुक्तियोद्धा- पीताम्बरकुर्मी- आदर्शविद्यालयस्य शिक्षकः अर्जुननाथाय प्रान्तप्रशिक्षणप्रमुखस्य नूतनदायित्वं समर्पितम्। एवं रूपेण त्रिपुराप्रान्तस्य सह प्रान्तमन्त्रीरूपेण माईकल- मधुसुधनदास-महाविद्यालयस्य संस्कृतविभागाध्यक्षः डॉ. तपनशीलाय नूतनं दायित्वं, तदनु केन्द्रीय- संस्कृत- विश्वविद्यालयस्य एकलव्यपरिसरस्य अध्यापकः डॉ. सुकान्त-प्रामाणिकाय प्रान्त प्रशिक्षणप्रमुखस्य नूतनदायित्वं समर्पितम्। कार्यक्रमेऽस्मिन् ३० संस्कृतकुटुम्बाश्च समुपस्थिताः आसन्। सम्पूर्णे ईशान्यक्षेत्रीयजनानां कृते संस्कृतमातुः सेवार्थं, तस्य कृते प्रेरणादानार्थञ्च अयं कार्यक्रमः विशेषरूपेण लाभकारकम् आसीत्।

## वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने 'अध्येता' इत्यस्य वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।
**काव्या-** नमस्ते नन्दिनि। अद्यतनी वार्ता अतीव रोचकी अस्ति। केरलस्य मुख्यमन्त्री पिनारायी विजयन्, वन्दे-भारत-कार्यक्रमे राष्ट्रियस्वयंसेवकसङ्घस्य गीतस्य विषये रेलविभागम् 'भयानकम्' इति कथयित्वा आक्षिप्तवान् अस्ति।
**नन्दिनी-** आम्, राजनैतिकविषयाः सर्वदा हास्यास्पदाः भवन्ति। इदानीम् अन्या वार्ता। तङ्गधारे कुपवारायां च सुरक्षाबलैः मादकद्रव्याणां महती तस्करी-प्रयासः विफलः कृतः।
**काव्या-** सुरक्षाबलानां सफलता तु श्लाघनीया। परन्तु इदानीं श्रूयताम्, वैद्यस्य पार्श्वे अपि आग्नेयास्त्रम्। अनन्तनाग-चिकित्सा-महाविद्यालये कस्यचित् वैद्यस्य पेटिकातः एके-सप्तचत्वारिंशत्-आग्नेयास्त्र गृहीतम्।
**नन्दिनी-** अहो, कीदृशी इयं घटना! वैद्यस्य पार्श्वे मारकास्त्रम् इति तु अतीव चिन्ताजनकम्। परम् इतः अपि दुःखदा वार्ता अस्ति। कश्चन नववर्षीयः बालकः विद्यालयस्य चतुर्थतलात् कूर्दनं कृत्वा मृतवान् अस्ति। तस्य मातापितरौ अन्यैः छात्रैः कृतस्य पीडनस्य आरोपं स्थापितवन्तौ आस्ताम्।
काव्या- एषा वार्ता तु हृदयविदारिका। बालकानां सुरक्षा विद्यालयेषु अपि नास्ति चेत्, कुत्रापि नास्ति। अद्यतनी वार्ता समाप्ता। श्वः पुनर्मिलिष्यामः। धन्यवादः। **ईदर-धीरजः**

# संस्कृतभारत्याः अखिलभारतीयाधिवेशने विशेषाकर्षणम्

## उत्तराखण्डप्रान्तात् आगतानां प्रतिनिधीनां शिरसि धृता विशेषशिरस्त्राणम्




**हिमसंस्कृतवार्ताः।** तमिलनाडुराज्ये नवम्बरमासस्य नवम्यां तिथौ कोयम्बटूरनगरस्थे अमृतविद्यालये संस्कृतभारत्याः अखिलभारतीयाधिवेशनं भव्यतया आयोजितम्। तस्मिन् अधिवेशने अस्य वर्षस्य विशेषम् आकर्षणं सर्वेषां दृष्टिं स्वं प्रत्याकृष्य स्थितम्। तत् आकर्षणं आसीत् उत्तराखण्डप्रान्तात् आगतानां प्रतिनिधीनां शिरसि धृता विशेषशिरस्त्राणं, यस्मिन् "गोमाता राष्ट्रमाता" इति उल्लेखः आसीत्। तत् केवलं वस्त्रभूषणं नासीत्, अपि तु भारतीयसंस्कृतेः परम्परायाः राष्ट्रभावनायाश्च सजीवं प्रतीकः अभवत्।
गोगंगाकृपाकांक्षिणः प्रसिद्धगोकथावाचकस्य सन्तगोपालमणि- महाराजस्य प्रेरणया यदा उत्तराखण्डप्रदेशस्य कार्यकर्तारः तत् शिरस्त्राणं धरन्तः अधिवेशनप्राङ्गणे उपस्थिताः अभवन्, तदा सर्वेषां हृदये स्वाभिमानं श्रद्धा च उद्भूते। "गोमाता" इति संकल्पः भारतीयसंस्कृतेः आत्मनि निहितः अस्ति। भारतस्य ग्राम्यजीवनं कृषि व्यवस्था च गोभिस्सह गाढं सम्बन्धं वहतः स्तः यद्गोभिर्विप्रैश्च वेदैश्च सतीभिः सत्यवादिभिः। अलब्धैर्दानशीलैश्च सप्तभिर्धार्यते मही॥ तथैव "राष्ट्रमाता" इत्यस्य भावः भारतीयत्वम् ऐक्यं, करुणां, सेवाचेतनां च प्रतिपादयति। "गोमाता राष्ट्रमाता" इत्यस्य संयोगः भारतीयचिन्तनस्य मूलस्थे मातृभावे नूतनजीवनं सञ्जनयति। अधिवेशनकाले यदा "वन्दे गोमातरम्" "वन्दे संस्कृतमातरम्" इत्यादयः घोषाः आकाशं व्याप्तवन्तः, तदा सम्पूर्णं वातावरणं भक्त्या ऊर्जया संस्कारेण च परिपूर्णं जातम्। देशस्य सर्वतः आगतानां प्रतिनिधीनां द्वारा संस्कृतभाषायाः भारतीयजीवनमूल्येषु च संवर्धनाय दृढः संकल्पः पुनः व्यक्तः अभवत्। संस्कृतभारत्याः एषः अधिवेशनः केवलं भाषायाः उत्सवः नासीत्, अपि तु राष्ट्रपुनर्जागरणस्य आध्यात्मिकप्रेरणाकेंद्रं च अभवत्। उत्तराखण्डप्रान्तात् आगतानां प्रतिनिधीनां संस्कारयुक्तं भावनात्मकं च प्रदर्शनं एतत् सूचयति यत् भारतस्य सर्वेषु प्रदेशेषु संस्कृतेः मूला अद्यापि दृढानि सन्ति। तेषां "गोमाता राष्ट्रमाता" इति शिरस्त्राणम् आराष्ट्रं प्रति एतादृशं सन्देशं वहति यद् यावत् वयं स्वपरम्परायाः मातृभूमेः च प्रति आदरं धारयिष्यामः, तावत् भारतस्य आत्मा सशक्ततया विराजते। अधिवेशनात् निष्क्रान्तम् एतत् सकारात्मकः सन्देशः प्रत्येकं भारतीयं प्रेरयति यत् सः स्वमातृभाषां मातृभूमिं मातृसंस्कृतिं च प्रति गौरवं समर्पणं च धृतवान् स्यात्।

# डॉ. आनन्दभारद्वाजः संस्कृतभारत्याः

## उत्तराखण्डप्रदेशाध्यक्षपदे नियुक्तः



**हिमसंस्कृतवार्ताः:- हरिद्वारम्**
उत्तराखण्डराज्ये संस्कृतशिक्षानिदेशकपदे पूर्वं कार्यं कृतवान् डॉ. आनन्दभारद्वाजः अद्य तमिलनाडुराज्यस्य कोयम्बटूरे प्रवर्तमाने संस्कृतभारत्याः अखिलभारतीयअधिवेशने उत्तराखण्डप्रदेशाध्यक्षपदे नियुक्तः अभवत्। सः पूर्वं उत्तराखण्ड- संस्कृत- अकादम्याः सचिवपदे अपि आसीत्। मूलतः उत्तरप्रदेशस्य अलीगढजनपदे जातः डॉ. आनन्दभारद्वाजः भौतिकविज्ञानविषये पीएचडी-उपाधिं प्राप्तवान्। सः शिक्षाविभागे राजकीयमहाविद्यालयस्य प्रधानाचार्यपदम् अथ च अपरशिक्षानिदेशकः विद्यालयीशिक्षायाः संस्कृतशिक्षानिदेशकपदं च अलङ्कृतवान्। सः विधिविशेषज्ञरूपेण प्रसिद्धः अस्ति। विक्रमशिला- हिन्दीविद्यापीठस्य उपकुलपतिः डॉ. गोपालनारसनः संस्कृतभारत्याः प्रदेशाध्यक्षपदे तस्य नियुक्तये महद्दायित्वमिति निर्दिष्टवान्। डॉ. भारद्वाजः धाराप्रवाहेण संस्कृतभाषां वक्तुं समर्थः अस्ति, तेन च आङ्ग्लभाषया Power of Meditation इति पुस्तकं लिखितम्। तस्य नियुक्तेः प्रसङ्गे रुडक्यां साहित्यकाराः कवयः संस्कृतभारत्याः कार्यकर्तृषु प्रो प्रेमचंद्रशास्त्री गिरीशतिवारी, गौरवशास्त्री, नागेन्द्रव्यासः, डॉ. रामभूषणबिजल्वाणः, डॉ. प्रदीपसेमवालः, धीरज मैठाणी, नीतीशश्च तम् अभिनन्दितवन्तः।

# संस्कृतभारत्याः अखिलभारतीयाधिवेशने उत्तराखण्डराज्यस्य रजतजयंतीमहोत्सवस्य उल्लासपूर्णं वातावरणम्




उत्तराखण्डप्रान्तस्य प्रतिनिधयः पारम्परिकवेशभूषां धृत्वा ब्रह्मकमलचिह्नितां विशिष्टां शीर्षावरणिकां धृत्वा यदा सभास्थलं प्रविशन् तदा सर्वेषां कार्यकर्तॄणां दृष्टिः तेषु निलग्ना। अस्य सांस्कृतिकप्रदर्शनस्य माध्यमेन देवभूमेः शास्त्रीयगरिमा च लोकसंस्कृतिश्च अद्भुतं समन्वयः प्रदर्शितो। उत्तराखण्डराज्यस्य पञ्चपञ्चाशत् प्रतिनिधयः परस्परं राज्यस्थापनादिनं अभिनन्द्य महतो राज्यआन्दोलनस्य बलिदानिनः श्रद्धया स्मृत्वा तेषां कृते नमनं कृतवन्तः। अस्मिन् सन्दर्भे ते बद्रीनाथं केदारनाथं गङ्गोत्रीं यमुनोत्रीं हेमकुण्डसाहिबं चेत्येतानि तीर्थस्थानानि भावपूर्वकं स्मृतवन्तः। अधिवेशने उपस्थितानां संस्कृतभारत्याः त्रिसहस्राधिकानां कार्यकर्तॄणां मध्ये उत्तराखण्डप्रतिनिधीनां सा सांस्कृतिकच्छविः प्रमुखमाकर्षणं जाता। "जयतु देवभूमिः जयतु देववाणी" इति घोषः सभामण्डपे प्रतिध्वनितः, यः अधिवेशनस्थलं ऐक्यभावेन च सांस्कृतिकगौरवेन च पूरितवान्। एतदायोजनं यत्र एकस्मिन् पार्श्वे उत्तराखण्डस्य संघर्षपूर्णइतिहासस्य च आन्दोलनस्मृतिनां च पुनर्जीवनं कृतम्, तत्र अपरस्मिन् पार्श्वे तदीयराज्यस्य शास्त्रीयः आध्यात्मिकः च सांस्कृतिकपरिचयः राष्ट्रियमञ्चे प्रकाशितः। तत्र डॉ. आनन्द भारद्वाजः, मनीषजुगरानः, गिरीशतिवारी, अरविंदनारायणमिश्रः, वेदव्रतो, गौरवशास्त्री, नागेन्द्रव्यासः डॉ. रामभूषणबिजल्वाणः, डॉ. प्रदीपसेमवालः, धीरजमैठाणी, नीतीशमैठाणी, राजेन्द्रप्रसादनौटियालः, राकेशसेमवालः, महेशदत्त उनियालः, भुवनेश्वरी देवी, अञ्जलिव्यासः, विवेकव्यासः चेत्यादिप्रभृतयः सविशेषं समुपस्थिताः।



।।श्री।।

चिक्कूबीजं फले स्थित्वापि, यदा फलपक्वं भवति तदा सहजगत्या स्वच्छतयाः बर्हिगच्छति। किन्तु आम्रबीजम् आम्ररसे यावत सज्जति तावत् फलपक्वं भवति तर्हि रसात् बहिः नागच्छति। अस्य परिणामं किम्? तर्हि जनाः सम्पूर्णतयाः तम् चूषित्वा, तदनन्तरम् एव तम् क्षिपति।चिक्कूबीजानुसारेण आचरणम् आवश्यकम्। मोहजाले स्थित्वापि समयानुसारं बर्हिगमनम् आवश्यकम्। आम्रबीजसादृश्यं मायारुपी रसे सज्जति तर्हि जनाः निष्पिडन कृत्वा क्षिपति। **डॉ. वर्षा प्रकाश टोणगांवकर पुणे / महाराष्ट्रम्**

# प्रो. प्रेमचंद शास्त्री 'संयोजनम् -2025' इत्यत्र आजीवनं योगदानहेतवे सम्मानितः




बेंगलुरुनगरे, नवम्बरमास 2025 तमे वर्षे विश्व आयुर्वेदपरिषदा कर्णाटकराज्यमुक्त-विश्वविद्यालयस्य मैसूरनगरस्य साहाय्येन आयोजिते राष्ट्रियसम्मेलने "संयोजनम्–2025" इत्यस्मिन् सुश्रुतायुरवेदचिकित्सामहाविद्यालयस्याध्यक्षैः वरिष्ठविदुषे प्रो प्रेमचन्दशास्त्रिणे आजीवनयोगदानाय सम्माननं प्रदत्तम्।तेभ्यः इदं प्रशंसापत्रं संस्कृतस्य आयुर्वेदस्य च भारतीयसंस्कृतेः प्रचारप्रसारसंरक्षणोन्नतिषु तेषां नित्यसमर्पणं राष्ट्रस्य च बौद्धिकसांस्कृतिकाधारस्य सुदृढीकरणे असाधारणं योगदानं च दृष्ट्वा समर्पितम्।समारोहे वक्तारः अवदन् यत् डॉ. शास्त्रिणः दूरदर्शिता विद्वत्ता च अनवरतप्रयत्नाश्च कारणभूताः समभवन् येन संस्कृतभारती विश्व आयुर्वेदपरिषद् इत्यादयः संस्थाः राष्ट्रियस्तरे नूतनदिशं प्राप्तवत्यस्ते उत्तराखण्डसंस्कृतअकादम्याः उपाध्यक्षपदे (2018–2021) अथ राजकीयायुरवेदमहाविद्यालये गुरुकुलकाङ्गडी–हरिद्वारे संहिता–संस्कृत–सिद्धान्तविभागाध्यक्षरूपेण अमूल्यं सेवायोगदानं कृतवन्तः।राष्ट्रियसांस्कृतिकशैक्षिकचालनेषु पञ्चचत्वारिंशद्वर्षपर्यन्तं निरन्तरयोगदानेन, ते अधुना विश्वायुरवेदपरिषदः मार्गदर्शकरूपेण, संस्कृतभारती–उत्तराखण्डन्यासस्य अध्यक्षरूपेण च विद्वद्भ्यः वैद्येभ्यः सामाजिकनेतृभ्यश्च प्रेरणास्रोतांसि भवन्ति।

कार्यक्रमस्य अन्ते परिषद्सदस्यैस्तस्मै सम्माननं कृतज्ञता च व्यक्तीकृते। उक्तं च यत् श्रीमतश्शास्त्रिणः जीवनं संस्कृत–आयुर्वेदयोः संयोजनस्य साक्षादुदाहरणं यत् आगामिसंततये मार्गदर्शकरूपेण दीपस्तम्भवत् भविष्यति। अस्मिन् अवसरे विश्व आयुर्वेदपरिषदः कर्णाटकराज्यमुक्तविश्वविद्यालयस्य आचार्यजनाः, सुश्रुतायुरवेदचिकित्सामहाविद्यालयस्य आचार्यविद्वज्जनाः वैद्यकीयच्छात्राः कर्मचरिणश्च उपस्थिताः आसन्।




## वेदरक्षा

वेदास्त्वाचूलमूलं धर्म्यप्रवृत्तिकम्। अतो वेदानां परमोपादेयत्वाद्, अतिशयतममहत्त्वशालित्वाच्च महर्षयस्तान् रक्षितुमपि पूर्णमुपायञ्चक्रुः। वेदा एतावद्दीर्घकालानन्तरमपि लोके समवाप्ताः सन्तीत्यत्र कारणमेव महर्षिकृतः प्रयत्नः। महर्षयो हि वेदरक्षार्थम् अष्टविकृतीनां व्यवस्थां विदधुः। ताः विकृतयः अधःस्थितेन शलोकेनाभिव्यक्तीक्रियन्ते-

**'जटा माला शिखा रेखा**
**ध्वजो दण्डो रथो घनः।**
**अष्टौ विकृतयः प्रोक्ताः**
**क्रमपूर्वा महर्षिभिः॥'**

मन्त्राणां प्रकृतोपलब्धः पाठः 'संहितापाठ'-पदेन व्यवह्रियते। अत्र कतिपया एव विकृतयो हि वर्ण्यन्ते। पदच्छेदपूर्वकपाठः 'पदपाठ' इत्युच्यते। क्रमपाठः स भवति यत्र पदपाठगतं प्रतिपदं पूर्वोत्तरपदाभ्यां सङ्गमय्य द्विरुच्चार्यते। जटापाठः स भवति यत्र क्रमपाठम् आलम्ब्य प्रतिपदयुगलं त्रिरुच्चार्यते। एतावान् भेदो यच्छिखायाम् अन्यच्चैकं पदमग्रे संश्लिष्टतां याति। उक्तञ्च-
**'पदोत्तरं जटामेव शिखामार्याः प्रचक्षते।'**
घनपाठो नितरां विलक्षणः क्लिष्टश्च। तत्र पदानाम् आवृत्तिः अनुलोमविलोमक्रमेण आसकृज्जायते। घनस्तु चतुर्विधः भवति। तत्र प्रथमप्रकारको वदति-

**'शिखामुक्त्वा विपर्यस्य तत्पदानि पुनः पठेत्। अयं घन इति प्रोक्तः।'**

प्रक्षेप-च्युत-व्यवसादादि-विकारेभ्यः परित्रातुं श्रुतिं पद-क्रम-घनजटादिपाठाः आविष्कृताः। एषां सद्भावेन न श्रुतिषु अद्यपर्यन्तम् अणुमात्रमपि दोषलेशः प्रविष्टो भवितुम् अशकत्। प्रातिशाख्यग्रन्था अपि वेदपाठस्य रक्षणार्थं विरचिता अभूवन्।

हिमसंस्कृतवार्ताः-वशिष्ठ व्यासः

# असमपुरोधाः डॉ. क्षेमराजनेपालः



भारतस्य इतरराज्येषु इव असमराज्ये अपि परम्परया बहवः लेखनीहस्ताः सुसाहित्यकाराः पण्डिताः अभवन्, वर्तन्ते चेति नात्र अतिशयोक्तिः। एतेषु उत्तरपूर्वाञ्चलभारतवर्षस्य असमप्रान्ते लब्धजन्मा, सम्प्रति कालस्य सुसाहित्यिकः मान्यः डॉ. क्षेमराजनेपालमहाभागः अन्यतमः। महाभागस्य संक्षिप्तपरिचयः अत्र उपस्थापयितुं प्रयत्यते। महोदयस्य पिता स्व. कृष्णप्रसादनेपालः, माता च स्व. कौशल्यादेवी। अनयोः पित्रोः सुपुत्रत्वेन महोदयः १९५८ तमे ख्रिष्टाब्दे विश्वनाथजनपदस्य 'मेइलबजार-गमिरिघाट' इति क्षेत्रान्तर्गते तेलेनी-नामके ग्रामे लब्धजन्मा आसीत्। एषः महाभागः 'चारालि- उच्चतर-माध्यमिक- बहुमुखि-विद्यालयतः निवृत्तिप्राप्तः संस्कृताध्यापकः वर्तते। सम्प्रति 'बालिपुखुरी, बुढीगाङ्' इति ग्रामीणक्षेत्रे निवसन् साहित्यसेवार्थं स्वजीवनमेव समर्पितवान् इव परिलक्ष्यते। महोदयेन कविता, कथा, प्रबन्धः, रम्यरचना, गीतम् इत्यादिविषयान् अधिकृत्य रचिताः नैकाः पुस्तककृतयः वर्तन्ते, याश्च नेपाली, असमीया, संस्कृतम्, आङ्ग्ला इत्यादिभिः भाषाभिः लिखिताः सन्ति ताः। एवमेव महोदयः नानापुस्तकपत्रिकादीनां सम्पादनां बहुधा कुर्वनवलोक्यते। प्रकाशिताः कृतयः प्राधान्येन एवं दृश्यन्ते-

नेपालीभाषायाम्-
१) मेरो देश, हिजो आज र भोलि (खण्डकाव्य) - १९९३.
२) साहित्य एकाडेमी पुरस्कार विजेता नेपाली साहित्यकार - २००२.
(सह लेखक - ज्ञानबाहादुर छेत्री)
३) नेपाली लोकसाहित्यको रूपरेखा - २००३.
४) अविनाशी (संस्कृतग्रन्थतः अनूदितकृतिः, मुख्यलेखकः - डॉ. विश्वनारायणशास्त्री)
५) भाषा र साहित्यका केही पक्ष (प्रबन्ध, समीक्षा)- २००६.
६) सृष्टि (महाकाव्य) - २००९.
७) केही कृति केही आकृति (प्रबन्ध, समीक्षा) - २०१७.
८) कवितालेख्य - २०१८.
९) पूर्वोत्तर भारतको नेपाली साहित्यको इतिहास - २०२१.

असमीयाभाषायाम् -
१) असमीया नेपाली जनजीवन - २००७.
२) असमीया आरु नेपाली भाषार तुलनात्मक अध्ययन - २०१६.
३) शिलालिपिर परा ई-लिपिलै - २०२१.

अन्याः कृतयः प्रकाश्यमानाः स्युः।

एवं सम्पादना अपि विविधा।

उपसंहारे महोदयस्य कागदोपरि सुलेखनी सर्वदा एवमेव अग्रे सरतु, भगवत्कृपा भवदुपरि सर्वदा तिष्ठतु इति शुभकामनास्माकं साहित्यप्रेमिणामिति, शम्।

असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः